© 2019 IJSRST | Volume 6 | Issue 1 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# कल्पनास्वरूपविचारः : मनोविज्ञाननये



**डॉ.सोमनाथसाहुः**
सहायकाचार्यः, शिक्षाविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) भोपालपरिसरः, भोपालम्

**शोधालेखसारः–** मानवश्च प्राणपणेन शक्तिसन्तुलनं स्थिरीकर्तुं प्रयतते। शक्तिन्तुलनस्थापनायै आत्मनो मनसो यथास्थानं स्थापनायै वा सोऽनेका व्यक्ता अव्यक्तश्च चेष्टाः करोति।मनोविज्ञानं मानवप्रकृतिचेष्टादिविषयकज्ञानोपार्जनस्य साधनम्। न च मानसिकक्रियाणां सम्यग्ज्ञानं विना तासु नियन्त्रणं शक्यम्। मनोवेगानां नियन्त्रणाय तेषां गूढानि कारणानि ज्ञातव्यानि। सूर्योदयानन्तरं यावत् शेतुं कामयमानोऽपि जनः प्रातरूत्थाय भ्रमणार्थं यतते। कल्पना ाक्तिमन्तः एव बालाः पञ्चतन्त्रादिकथां काव्येषु प्रतिपादितं सौन्दर्यादिकं य रचयितुं समर्थाः भवेयुः। तस्मात् बालानां कल्पनाशक्तिर्वर्धनीया।
**मुख्यशब्दः–** पञ्चतन्त्रादिकथां, विज्ञानं, मनोविज्ञानं, कल्पनन्नु, पुरुशेण, पुरतः घटो,।

अनवरतं परिवर्तनं विश्वस्य सामान्यः स्वभावः। अस्मिन् परिवर्तने मानवो न केवलमुदासीनो द्रष्टा भवति, अपि तु स स्वयं परिवर्तनं विदधाति। बाह्याः परिस्थितयः प्रतिक्षणं तस्य स्थितिं परिवर्तयितुम्, तस्य शक्तिसन्तुलनं नाशयितुं वा चेष्टन्ते। मानवश्च प्राणपणेन शक्तिसन्तुलनं स्थिरीकर्तुं प्रयतते। शक्तिन्तुलनस्थापनायै आत्मनो मनसो यथास्थानं स्थापनायै वा सोऽनेका व्यक्ता अव्यक्तश्च चेष्टाः करोति। मनसो गतिर्विचित्रा दृश्यते हि मनोभेदेन व्यक्तिभेदः। मन एव मनुष्यस्य सर्वकर्मणां नियामकम्। उपनिषत्सु मनसो वशीकरणाय, शुद्धये, उदात्तीभावनाय च विचारः कृतो वर्तते। **'यन्मनसा न मनुते येनाहुर्मनोमतम्' इत्यादिभिर्मन्त्रैर्मनसः कार्यक्षेत्रम्, शक्तिसीमानम् निर्दिष्टम्। भगवता व्यासेनापि वारं वारम् 'विज्ञानसारथिर्यस्तु मनः प्रवाहवान्नरः'** तथा –

**इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।**
**मनसस्तु परा बुद्धिबुद्धेरात्मा महान् परः।।**

इत्यादिना तदेव विशदीकृतम्। एवञ्च मनसो विज्ञानं मनोविज्ञानं हि कथ्यते। मनोविज्ञानं हि चेतनस्याचेतनस्य च मनसः प्रत्यक्षाणां परोक्षाणां च व्यवहाराणामध्ययनं करोति। तच्चातीवोपयोगि।

मनोविज्ञानं मानवप्रकृतिचेष्टादिविषयकज्ञानोपार्जनस्य साधनम्। न च मानसिकक्रियाणां सम्यग्ज्ञानं विना तासु नियन्त्रणं शक्यम्। मनोवेगानां नियन्त्रणाय तेषां गूढानि कारणानि ज्ञातव्यानि। सूर्योदयानन्तरं यावत् शेतुं कामयमानोऽपि जनः प्रातरूत्थाय भ्रमणार्थं यतते। क्रोधं जेतुमिच्छन्नपि समय उपस्थिते क्रोधाविष्टो भवति पुरुषः। एवञ्च सर्वस्यापि कारणमन्तर्मनस्यन्वेष्टव्यम्। तच्च मनोविज्ञानेनैव सम्भवति। मनोविज्ञानेन शिक्षणस्य सरला उपायाः, धारणानियमाः, शिक्षितस्य सम्यगुपयोगः, अवधानस्य वशीकरणं, कल्पनाशक्तिविकासः इत्यादि बहु नित्योपयोगि ज्ञायते। तत्र **'कल्पनास्वरूप विचारविषये'** विव्रीयते सम्प्रति।

विपर्ययप्रकारः कल्पनं नाम उच्यते। तदेव मनोराज्यमित्यप्युच्यते। साधारणस्तु विपर्ययो न पुरुशेच्छया कर्तुम् कर्तूमन्यथाकर्तुं वा शक्यः। कल्पनन्नु पुरुशेण स्वेच्छया येन केनापि प्रकारेण कर्तुमकर्तुं वा शक्यम्, यथा मनोराज्यादिकम्। ध्यानमप्यारोपरूपमद्वैतिनां मतेन कल्पनमेव, स्वेच्छया कर्तुमकर्तुमन्यथाकर्तुं वा शक्यत्वात्। तथोक्तं विद्यारण्येन– ध्यानं त्वनुभूते नानुभूते वा धर्माणां निरङ्कुशं कल्पनं यल्लोके मनोराज्यमिति प्रसिद्धिम्। स्वच्छामनोभ्यां विना साधनान्तरानपेक्षत्वात्। ... न हि मनोराज्यं राज्यादिना शास्त्रेण वा निवारयितुं शक्यते। परन्तु शास्त्रोक्तध्याने (कल्पने) फलविशेषो भवति नेतरत्र। पुनश्चोक्तं शास्त्रोक्तकल्पनध्यानविषये तेनैव–तदेवं.... वस्तुविषयं प्रमाणजन्यं ज्ञानं, जन्यफलं वस्तुनिरपेक्षं पुरुषेच्छाप्रयत्नमात्रजन्यं ध्यानम्।

अपरश्चायं विशेषः कल्पनायाः– कल्पना न साधारणविपर्ययवदधिष्टानविशेषमपेक्षते, यत्र कुत्रापि स्वेच्छया कल्पनस्य सम्भवात्। न च कल्पनं मानसभ्रान्तिवदिन्द्रियसंप्रयोगमपेक्षते। चक्षुषी निमीलित्याऽपि रूपादिकल्पनस्य सम्भवात्। यथा च मानसभ्रान्तिर्दोषबलादापतति न तु तत्र पुरुषेच्छाऽपेक्षा, कल्पनस्तु पुरुषस्य स्वेच्छया सम्भवतीत्यादिर्विशेषो बोध्यः।

बौद्धमतेन तु वस्तुनि स्वलक्षणे नामाजात्यादिज्ञानमपि कल्पनमेव। न हि वस्तुनि नामजात्यादिकं किञ्चित् पारमार्थिकमस्ति, बुद्धिनिर्माणं कल्पनं हि तदिति।

कल्पना मनसः स्वभावविशेषः, अतैव हि उच्यते कल्पना मानसी प्रक्रियेति। कल्पनायाः नैके परिभाषाः वर्तन्ते। तथा हि।

1. पूर्वानुभवानुगतदेशकालस्मृत्युद्बोधनं विनैव पूर्वानुभवकल्पनाप्रतिमानामभिनवरूपेण संयोजनं परिणामो वा कल्पना इत्यभिधीयते।
2. प्रत्यक्षप्रयोजनविशेषरहिता प्रस्तुतप्रत्यक्षज्ञानव्यतिरिक्ता पूर्वकल्पनाप्रतिमापुञ्जस्याभिनव–संयोजनात्मिका कल्पना भवति।'
3. पदार्थस्यानुपस्थितौ तद्विषयकस्य कस्यापि विचारस्य मनसि सञ्चारः 'कल्पना' इति सामान्या परिभाषा।

मौग्डूगल महोदयः वदति Imagination is the thinking of remote objects इति। बुडवर्थ (Woodworth R.S.) महोदयः Imagination is mental manipulation- When the individual recalls facts previously observed in reallyAnd the proceeds to arrange these facts in to a new pattern, he is said to show facts **imaginations**. इति।

एवञ्च सामान्यतः विचारयामश्चेत् ज्ञायते यत् वृत्तस्यानुभवस्य पुनः मनोमुकुरे प्रतिष्ठापने यः स्वभावः मनसो वर्तते तस्य कल्पना (Imagination) इति नाम। अयं स्वभावः यं व्यापारं विदधति तस्य व्यापारस्य नाम बिम्बनम् (Imaginary) इति। अस्य व्यापारस्य फलत्वेन यत् मनोमुकुरे (मानसपटले) प्रतिफलितं भवति तस्य बिम्ब (Image) इति नाम। मनोविज्ञानिनः प्रायः असकृत् प्रथमं पदद्वयं समानार्थकत्वेन उपयुञ्जते। एवञ्च एतत् त्रयमपि कल्पनाशब्देन व्यवहरन्ति। तस्मात् एषां पदानामर्थः अवश्यं ज्ञातव्यः यथासम्भवम्।

तत्रादौ इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। अर्थात् वस्तु दृष्टवतो मानवस्य यज्ज्ञानं जायते 'अयं घटः अयं पटः' इति तस्य प्रत्यक्षम् इति नाम।

यदा तस्यैव पुरतः घटो न भवति तदा तमधिकृत्य चिन्तने यः स्वभावः मनसो वर्तते तस्य कल्पनेति नाम।

अनेन स्वभावेन व्यापारितं मनः क्रियाशीलं सत् घटस्य पटस्य वा रूपं मनोमुकुरे (मातसपटले) अवस्थापयितुं प्रयतत इत्यस्य बिम्बनं (Imaginary) इति नाम।

अनेन व्यापारेण कम्बुग्रीवादिमान् पृथुबुनाकारः योऽयं घटः मनश्चक्षुषा (Brains eye) विलोक्यते तस्य साक्षात्कृतस्य घटरूपस्य बिम्बः प्रतिमा चित्रम् वा (Image) इति नाम।।

यदा मनुष्यः किञ्चित् पश्यति, शृणोति, जिघ्राति, स्वादयति, स्पृशति वा तदा तस्य दर्शनश्रवणघ्राणास्वादनस्पर्शाणां चित्राणि दर्शनाद्यनन्तरं मनसि तिष्ठन्ति येन, वस्तुप्रत्यक्षं विनाऽपि पुनर्मनसा तद्दर्शनादिकल्पना सम्भवति। एतानि चित्राणि 'प्रतिमा बिम्बः वा कथ्यन्ते। एते ज्ञानेन्द्रियादिजन्याः षड्विधाः भवन्ति। तद्यथा

| | | |
|---|---|---|
| दृष्टिप्रतिमा | – | दृष्टिमूलप्रत्यक्षजन्या |
| श्रवणप्रतिमा | – | श्रोत्रकरणकप्रत्यक्षजन्या |
| स्वादप्रतिमा | – | रसनमूलकप्रत्यक्षज्ञानजन्या |
| घ्राणप्रतिमा | – | घ्राणमूलकप्रत्यक्षज्ञानजन्या |
| स्पर्शप्रतिमा | – | स्प किरणकप्रत्यक्षजन्या |

जनेषु नहि सर्वाः प्रतिमाः समानाः। केषुचिद् दृष्टिप्रतिमानां प्राचुर्थम्, अन्येषु श्रवणप्रतिमानाम्। यथा–अन्धेषु श्रवणस्पर्शप्रतिमानां बाहुल्यं भवति। एवमेव केषाञ्चित् प्रतिमा विशदाः, स्पष्टाः, सविवृत्तयः, तीव्रतराश्च भवन्ति, अन्येषाम् अपूर्णाः, अस्पष्टाः, स्थूलाश्च। एवञ्च सारतः वदामश्चेत् यस्य यादृश्यः प्रतिमाः तस्य तादृशी कल्पना भवति

**कल्पनायाः महत्त्वम्**

कल्पना मानवमनःशक्तिषु सर्वाधिकमहत्त्वपूर्णा, अद्भुता च। कल्पनाशक्तयैव मानवः चिन्तनं सर्वं कर्तुं पारयति। जीवनं वर्तमानम् अस्ति, स्मृतिः अनुभवः कल्पना च मानवस्य योजनशक्तिः अस्ति। अद्यतनकार्येषु गतानुभवान् अवधाय वर्तमानं कथं संरक्षणीयम् ? एतदर्थं कल्पनाशीलता आवश्यकी। कल्पना सकारात्मका सृजनात्मिका दूरगामिनी च भवेत्। कल्पना जीवनाय महत्त्वदानस्य श्रेष्ठ माध्यमम् अस्ति। रसः, माधुर्यं, स्नेहः, लालित्यभावश्च सर्वम् अपि कल्पनया संयुक्तम् अस्ति।

व्यवहारस्य भाषायाम् अस्माभिः स्वप्नदर्शनम् इत्युच्यते। यदा मानवः स्वप्नं द्रक्ष्यति तदा एव तत्पूरयितुम् अपि शक्नोति। यः स्वप्नम् एव न द्रक्ष्यति तस्य विकासस्तु असम्भवः एव। केवलं दिवास्वप्नं एवं व्यर्थं न भवति। स्वप्नः व्यक्तिगतधरातलस्य अपि भवितुं शक्नोति, कार्यक्षेत्रस्य अपि जीवनस्य कस्यापि क्षेत्रस्य च, येन सह वयं संयुक्ताः भवितुम् इच्छामः।

सामान्यधारणा इयम् अस्ति यत् स्मृतिः बन्धनम् अस्ति। या मानवं स्वकीयैः अतीतैः सह बद्ध्वा स्थापयति। स्मृतिकारणात् मानवः मुक्तः स्थातुं न शक्नोति। स्मृतौ अनेकानि विम्बानि प्रतिबिम्बानि च भवन्ति। प्रतिध्वनयः भवन्ति प्रतिक्रिया भवन्ति च, या मानवस्य जीवनं सीमितं कुर्वन्ति। तच्च एकनिश्चितदिशि एव बद्ध्वा स्थापयति। स्मृतिकारणात् बहुशः मानवः वर्तमाने अपि जीवितुं न शक्नोति। स्वकीयस्मृतिषु एव सः सर्वदा मग्नः भवति। परञ्च कापि उपलब्धिः न भवति। स्मृतौ। मग्नता कल्पना नास्ति स्वप्नश्च नास्ति।

स्मृतिं खण्डयित्वा बहिरागमनन्तु कल्पनायाः कार्यम् अस्ति। जीवनाय दिक प्रदर्शनम् अपि कल्पनायाः कार्यम्। मानवस्य मनसि झञ्झावातस्य उत्पत्तेः तु कल्पना एवं कर्तुं शक्यते। जीवनस्य बोधनं करोति। अद्यतन–आधुनिकप्रबन्धव्यवस्थायां भोजनशब्दस्य अर्थः अपि कल्पना एव। परिणामस्तु कस्यापि हस्ते नास्ति। केवलं प्रयासकार्यम् एव अस्माकम् लक्ष्यं संनिर्धार्य प्रयासस्य दिङ्निश्चितीकरणम् अस्माकं कल्पनाशक्तेः कार्यमेव। प्रबन्धकीययोजने अनेकेशां विशेषज्ञानां सृजनशीलता कल्पना च उपयोगे आगच्छतः। योजनायाः प्रारूपं सकारात्मकं भवति। भाविदृष्टिकोणमपि तस्मिन् समाहितं भवति अस्माकं भविष्य निश्चितं करोति।

कश्चन जनः सेवाकार्यं करोति। गृहात् पत्रम् आयाति यत् एतस्मिन् दिनांके भवतः विवाहः भविष्यति। सः मानवः दशपञ्चदशदिनानाम् अवकाशं स्वीकृत्य गृहं गच्छति। विवाहं कृत्वा भार्याञ्च स्वीकृ

त्य पुनः सेवास्थलं गच्छति। गतस्य परिवारस्य भाविजीवनस्य कल्पनां सुखेन कर्तुं शक्नुमः। द्वयोः अपि सकाशे स्वप्नं द्रष्टुं समयः न भवति। वाग्दानविवाहयोः मध्ये यः अन्तरालः जीवनस्य सर्वाधिक महत्त्वपूर्णः भागः विद्यते यतो हि मानवः स्वजीवनविषये अनेकस्वप्नान् पश्यति। तेन एतत्तु अवगम्यते यत् भाविजीवनचित्रस्य पारिवारिकी सामाजिकस्थितिश्च कीदृशी विद्यते? आर्थिकस्वरूपं शैक्षणिकस्वरूपञ्च कीदृशं विद्यते?

भाविसम्बन्धस्य मधुरतायाः अयं कालः प्रायशः कन्यकानां कृते अत्यधिकः महत्त्वपूर्णः भवति। ताभिः स्नेहं माधुर्यञ्च स्वीकृत्य अग्रे वितरणीयं विद्यते अस्य कालस्य सम्पूर्णकल्पना रसयुक्ता भवति। जीवने रसस्य नूतनसञ्चारः भवति। अयं रसः आजीवनं भवति। आजीवनं जीवनमित्राय अयं रसः दीयते।

मातृत्वकालः अपि एवम् एव स्वप्नदर्शनकालः विद्यते, यत्र रसस्य प्रधानता भवति। माधुर्यं स्नेहश्च भवतः। ओष्ठौ ध्वनिं कुरुतः। अयम् एव रसः बालकाय आजीवनं दीयते। परञ्च एतस्य रसस्य प्राप्तये समयः अपेक्षितः भवति। एतद् विना सर्वं नीरसम् अथवा पुस्तकं पठित्वा कृतम् इति प्रतीयते। भावनानां गहनता अल्पा भविष्यति, बुद्धेः धरातलं व्यापकं भविष्यति। जीवनस्य सर्वे सम्बन्धाः भावप्रधानाः भवन्ति। जीवनस्य सर्वेषु क्षेत्रेषु लक्ष्यनिर्धारणस्य कार्यं, कार्येण सह संपूर्णमनोयोगस्य स्मृतेः मुक्ततायाः च मार्गं कल्पना एवं प्रशस्तं करोति। भावः यदि नकारात्मकः विद्यते तर्हि मनसि अनेकविधसंशयानाम् आवेगानाम् उद्विग्नतायाश्च जन्म ददाति कल्पना एव। कल्पनायाः प्रवाहे एतावती शक्तिः भवति यत् मानवः स्वकीयम् अतीतं वर्तमानञ्च एतद्द्वयमपि विस्मरति। सः ऊर्जायुक्तस्य अपेक्षया ऊर्जाहीनः जायते।

स्मृतिः भवेत् अथवा कल्पना एतद्वयम् एव साधनम् इव उपयुक्तं भवेत्। एतत् साध्यं न भवेत्। अपेक्षा इयम् अस्ति यत् कार्यस्य समाप्त्या सह एव स्मृतिः कल्पना च एतद्धयम् अपि सुप्तं स्यात्। दिनचर्यासमाप्तेः अनन्तरं वयम् आत्मनि तिष्ठेम तथा च श्वस्तनी चिन्ता न भवेत्।

वैयक्तिक–सामाजिकधरातलेषु वयं स्वज्ञानम् अनुभवान् च सहैव स्थापयित्वा स्वभाविजीवनस्य कल्पनां कुर्मः तथा च मनसि पटुतां जागरय्य निश्चितम् एकं लक्ष्यं विनिश्चित्य कार्यस्य प्रारम्भं कुर्मः चेत् जीवनं परिवर्तयितुं शक्नुमः। स्वाध्याये अपि वयम् एतद् एव कुर्मः – किं कर्तव्यं? किं न कर्तव्यं? किञ्च भवितव्यम्? एकं निश्चितं लक्ष्यं स्वीकृत्य नियमितं योजनाकरणं, भविष्यस्य नूतनलक्ष्यस्य निश्चयीकरणं तथा च व्यापकतायाः भावः मानवस्य कल्पनाम् एव स्वाध्यायं करोति। कल्पनायाः सर्वाधिकाः उज्ज्वलः पक्षः अयम् अस्ति यत् एतेन मानवः सर्वदा आशावान् भवति। प्रत्येकं छात्रः उत्तमाङ्कैः उत्तीर्णतायाः स्वप्नं पश्यति। भविष्यत्कालस्य चित्रं निर्माति। अत्र च मधुरता भवति, सहैव महान् भवितुं सुखम् अपि। सकारात्मककल्पनायां कटुता तु किञ्चित्मात्रम् अपि न भवति। यथार्थस्य सहयोगेन, स्वक्षमतानुसारं सः संघर्षं कर्तुं सिद्धः भवति। यः महान्तं स्वप्नं पश्यति, सः लघु भवितुं न शक्नोति।

विज्ञानिनः वेदान्तिनः भिषजः यान्त्रिकाः अन्ये च भविष्यन्तमर्थं कल्पनाशक्तिसाहाय्येनैव जानन्ति। साहित्यसङ्गीतचित्रकलाशिल्पादीनामनुभवोऽपि कल्पनाशक्तिमतामेव। कल्पनाशक्तिरेव परकीयं दुःखं

दर्शयति। हृतराज्यस्य नष्टभार्यस्य सुग्रीवस्य दुःखं, तत्समानावस्थाः श्रीरामः 'आत्मानुमानात् पश्यामि' इति कथयन् आत्मना ज्ञानं निवेदयति। एवञ्च कल्पना–

- सोपस्थितं चिन्ताजालं विस्मारयति।
- मनोरमं लोकम् अक्ष्णोः समक्षमानयति।
- पीडितान् प्रति करुणां जागरयति।
- साहित्यसङ्गीतकलाविज्ञानानां जननी।
- दूरस्थैः प्रणयिभिः सह सम्पर्कं स्थापयति।
- सर्जनात्मकशक्तेः अभिवर्धने सहायिका भवति।

**कल्पनाप्रभेदाः**

बिम्बोत्पादनसमर्थस्य मनोव्यापारस्य अथवा तत्स्वभावस्य कल्पनेति नामेति पूर्वमुक्तम्। इयं कल्पना ग्रहणात्मिका, सृजनात्मिकायाश्चेति द्वेधा भवति।

तत्र ग्रहणात्मिकायाः कल्पनायाः उदाहरणं प्रबन्धकाव्यपाठकः, सृजनात्मिकायाश्च तल्लेखकः। उभावपि कल्पना कुरुतः। प्रथमो लेखकानुसारेण सङ्केतान् गृह्याति, द्वितीयश्च तान् विचारयति। सृजनात्मिकाया अपि द्वौ भेदौ। तत्र प्रथमोपयोगिनी (फलमूलकः), द्वितीया सौन्दर्यात्मिका। उपयोगिनी कल्पना सैद्धान्तिकी क्रियात्मिका च भवति। वैज्ञानिकः कस्यचिद् सिद्धान्तस्याविष्काराय विचारमग्नो भवति, यान्त्रिकश्च किञ्चिन्निर्मातुम्। उभावपि कल्पनाक्रियां कुरुतः। सौन्दर्यात्मिका कल्पना कलात्मिका विक्षेपात्मिका च भवति। कलात्मिका कल्पना चित्र–नाट्य–नृत्य–सङ्गीत–काव्य मूर्ति–प्रबन्धादिरूपैण तिष्ठति। विक्षेपात्मिका कल्पना ततो भिन्ना। तस्यां मनः स्वतन्त्रं भवति, क्रियाविषयश्च न तु क्रियाकारकम्। एवञ्च विक्षोपात्मिका कल्पना कालपात्रभेदेनानेकानि रूपाणि गृह्णाति।



**कल्पनोदाहरणानि**

कल्पनापि चिन्तनप्रभेद एव। कल्पना मानसी प्रक्रिया वर्तते। यथा मृगा बारम्बारमस्माभिः उद्यानेषु दृष्टाः। सुवर्णोऽपि आपणेषु दृष्टाः। यदा कश्चन ब्रवीति 'सुवर्णमृगोऽयम्' इति, तदा वयं सुवर्णमृगः कदापि दृष्टपूर्वः इति न स्मरामः। अत एव सुवर्णमृगः स्मृतिगोचरत्वं नापद्यते। नापि सुवर्णमृगस्य प्रत्यक्षज्ञानमेवोपपद्यते; अवस्तुभूतत्वात्। अत एव सुवर्णमृगप्रत्ययः कल्पनेत्यभिधीयते। श्रूयते हि–

**नीतो न केनापि न दृष्टपूर्वा**
**न श्रूयते हेममयः कुरङ्गः।।**
**तथापि तृष्णा रघुनन्दनस्य**
**विनाशकाले विपरीत बुद्धिः।।** इति।।

अन्यानि कल्पनोदाहरणानि सुगन्धिसुवर्णम्, इक्षुफलम्, चन्दनपुष्पम्, आकशकुसुमम्, बन्ध्यासुतः इत्यादिनि भवन्ति। तत्रोक्तं भवति –

**गन्धः सुवर्णे फलमिक्षुदण्डे**
**नाकारि पुष्पं खलु चन्दनेषु।**
**विद्वान् धनाढ्यो न च दीर्घजीवी**
**धातुः पुरा कोऽपि न बुद्धिदोऽभूत्**।। इति।।
**एषः वन्ध्यासुतो याति खपुष्पकृतशेखरः**
**कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।।**

एवञ्च नहि पूर्वं दुग्धकुल्या केनापि दृष्टा, नापि स्नेहेन कमपि कोऽपि स्नपयितुमर्हति। तथाऽपि महाकविभवभूतिः उत्तररामचरिते वदति –

**स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते**
**धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः।। 3**/23
एवमेव शेलाधिराजतनयायाः पार्वत्याः विषये कविकुलगुरुः कालिदासः भणति कुमारसम्भवे–
**पुष्पं प्रवालोपहितं यदि स्यात्**
**मुक्ताफलं वा फुटविद्रूमस्थम्।**
**ततोऽनुकुर्याद्विशदस्य तस्या**
**स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य।।1**/44

**शिक्षाक्षेत्रे कल्पनायाः प्रयोगः**

- चित्रकला, अभिनयः, मृत्तिकया वस्तुनिर्माणम् इत्याद्यंशेषु प्रशिक्षणव्यवस्थां कृत्वा बालकेषु रचनात्मकप्रवृत्तेः विकासाय प्रयत्नः करणीयः।
- भाषाज्ञानस्य कल्पनाशक्तेश्च गभीरसम्बन्धः वर्तते। अतः पितरः अध्यापकाश्च बालकस्य भाषाविकासाय विशेषप्रयत्नान् कुर्युः।
- कल्पना व्यक्तिम् आनन्दलोकं प्रति नयति। कौमाराः दिवास्वप्नैः अतृप्तेच्छानां विषये सन्तृप्ताः भवन्ति।
- कल्पनया बालकः वातारणे सामञ्जस्यं प्राप्नोति।
- भाषाध्यापकाः तत्तद्भाषाभिः कथाः, कविताश्च लेखितुं छात्रान् प्रेरयेयुः।
- विज्ञानस्य अध्यापकाः विविधप्रयोगप्रदर्शनेन वैज्ञानिकाविष्काराणां व्याख्यानेन च छात्रेषु कल्पनाशक्तिं वर्धयितुं शक्नुयुः।

**कल्पनाशक्तेः वर्धनोपायाः**

कल्पनाशक्तिः सच्चारित्त्यं वर्धयति। बालकः रामहरिश्चन्द्रादीनां चरितमवगत्य तद्वत् वर्तितव्यमिति चिन्तयति।

भावनाक्रीडा बालानां कल्पनाशक्तिं वर्धयति। यथा शिशवः कुत्रिमाः पुत्तलिका निर्माय तासां विवाहं रचयन्ति, प्रसाधनस्नानादिकं कारयन्ति, भोजयन्ति च। कदाचित् पुच्छं धारयित्वा हनुमतो रूपं विरचय्य लङ्कादहनमभिनयन्ति।

प्रारम्भदशायां मृद्भिः प्रतिमाकरणं कर्गदपत्रैः वस्तुकरणम्, चित्रलेखनं, लिखितस्य चित्रस्य वर्णार्पणं च कल्पनां वर्धयेत्। बाललिखितचित्रादिषु दोषाद्धाटनापेक्षया स्थितस्य गुणस्याभिनन्दनमेव कार्यम्। भाषाध्यापने विद्यार्थिभिरुपाध्यायैश्च क्रियमाणं कथावर्णनं कल्पनां वर्धयेत्। एवञ्च पाठशालापत्रिकाप्रकाशनं, प्रदर्शनीनिर्माणम्, कक्ष्यायाः अलङ्करणं, स्वच्छतासम्पादनं, मानसोल्लासकार्यम्, शैक्षणिकयात्रागमन, वादगोष्ठी, प्राचीनवस्तुसंग्रहालयगमनमिति बहवः उपायाः वर्तन्ते कल्पना ाक्तेः अभिवर्धनाय। कल्पना ाक्तिमन्तः एव बालाः पञ्चतन्त्रादिकथां काव्येषु प्रतिपादितं सौन्दर्यादिकं य रचयितुं समर्थाः भवेयुः। तस्मात् बालानां कल्पनाशक्तिर्वर्धनीया।

इति शम्।

**सन्दर्भाः**


1 परमलघुमञ्जूषा, चौखम्बा सुरभारती प्रका ान, वाराणसी–01

2 उत्तररामचरितम् 3/23, चौखम्बा सुरभारती प्रका ान, वाराणसी–01

3 कुमारसम्भवम् 1/44, चौखम्बा सुरभारती प्रका ान, वाराणसी–01

4 डॉ. एस्. एस्. मायुर, शिक्षामनोविज्ञान, विनोदपुस्तकमन्दिर, आगरा।।

5 साहित्यपरिचय (अगस्त–अक्टूबर 1980) बालसमस्या विशेषाङ्कः 1980, विनोद पुस्तकमन्दिर, आगरा।
6 वाक्यार्थभारती, अङ्कः दृ 02, वर्षम् – 2011–12, राष्ट्रियसंस्कृतसंस्थानम्, राजीवगान्धीपरिसरः, शृङ्गेरी–39
7 शिक्षायाः मनोवैज्ञानिकाधाराः, डॉ. बि. पद्ममित्रश्रीनिवासः, जगदीशसंस्कृतपुस्तकालयः (2012) जयपुरम् – 01
8 शिक्षा मनोविज्ञान, एस. के. मंगल, पी.एच.आई. लर्निङ्ग पी.वी.टी., दिल्ली 92 (2013)
9 उच्चतर नैदानिक मनोविज्ञान, अरुण कुमार सिंह, मोतीलाल बनारसीदास, पटना– 05
10 Prabhu DayalAgnihotri, Ahinava manovignanam, Varanaseya Sanskrit visvavidyalaya, varanasi - 02
11 V. S. Venkata Raghavacharya, Educational psychology, R.S.Vidhyapeetha, Tirupati
12 P. N. Bhattacharya A Text book of psychology (part two), mukherjee & cooparative ltd, Calcutta 73
13 Sri Mamarajadatta Kapila, Arvacinam Manovignanam, Sampurnanda Sanskrit university, Varanasi 02
14 Indian Journal of teacher Education Anweshika, Vol-7, No.-1, June-2010, N.C.T.E., New Delhi.
15 Journal of Indian Education Vol-xxxvi, No-3, Nov-2010, N.C.T.E., New Delhi.
16 http:/en.wikipedia.org/wiki/anxiety
17 Manavamanah Prakrutih Prekniyacha, Sanskrit bharati, New Delhi-55
18 Prachina Bharatiya Monovidya, Dinesh Chandra Bhattacharya Shastri, J.N. Sircan, (1972) Culcutta - 32